National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024;** 1(55): 211-213
© 2024 NJHSR
www.sanskritarticle.com

**सिमरन रवीन्द्र ठाकुर**
साहायकप्राध्यापिका, व्याकरणविभागः,
कविकुलगुरुकालिदाससंस्कृतविश्व-
विद्यालयः, रामटेकम्

**Correspondence:**
**सिमरन रवीन्द्र ठाकुर**
साहायकप्राध्यापिका, व्याकरणविभागः,
कविकुलगुरुकालिदाससंस्कृतविश्व-
विद्यालयः, रामटेकम्

# वृद्धिरादैच् इति सूत्रविषये लक्ष्मीटीकायाः महाभाष्यस्य च तुलनात्मकमध्ययनम्

**सिमरन रवीन्द्र ठाकुर**

**शोधसारः**

महाभाष्यकारेण महर्षिणा पतञ्जलिना प्रणीतं मङ्गलार्थं **वृद्धिरादैच्**[1] इति सूत्रम्। वैयाकरणसिद्धान्तकौमुद्याः टीकासु अन्यतमा सुप्रसिद्धा च टीका लक्ष्मी इति नामाख्या। तत्र वैयाकरणसिद्धान्तकौमुदी इति ग्रन्थम् आदाय तत्क्रमेणैव महान् विचारः प्रवृत्तः। एतत्प्रक्रियाक्रमानुगुणम् एव अस्मिन्नपि ग्रन्थे सूत्राणां विचारः कृतो दृश्यते।

महाभाष्यस्थस्य अस्य सूत्रस्य विचारः कञ्चिद्विशिष्टं पन्थानम् अनुसरति। तथैव लक्ष्मीटीकायां शास्त्राध्ययनपद्धतौ पठितानां समासामेव टीकानां अंशान् विशिष्टरीत्या स्वविचारान् च आदाय प्रवृत्तः विशिष्टः बिन्दुग्रहः सुचारुतया द्रष्टुं शक्यः। यद्यपि महाभाष्ये लक्ष्मीटीकायाञ्च विशिष्टाविशिष्टानि सर्वाणि एव सूत्राणि व्याख्यातानि अथापि इह प्राधान्येन वृद्धिरादैच् इति सूत्रविषये उभयत्र प्रोक्ता अंशा विचार्यन्ते। इह प्राधान्येन अपूर्वाः केचन अंशाः विचार्यन्ते।

**शोधपद्धतिः**

शोधपत्रेऽस्मिन् मया तुलनात्मकमध्ययनपद्धतिमादाय उभयोः ग्रन्थयोः कार्यं क्रियते।

**सङ्केतशब्दाः**

वृद्धिरादैच्, वृद्धिः, लक्ष्मीटीका, महाभाष्यम्।

**विषयः**

पण्डितश्रीसभापतिशर्मोपाध्यायविरचितायां वैयाकरणसिद्धान्तकौमुदीमनुसरन्त्यां लक्ष्मीनामाख्यायां टीकायां वृद्धिरादैच् इति सूत्रं संज्ञाप्रकरणे पठितम्। महाभाष्ये हि **माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति।**[2] इत्येवं मङ्गलाय भाष्यकृता आदितः वृद्धिशब्दः पठितः।

**महाभाष्ये वर्तमानः विषयक्रमः**

महाभाष्ये प्राथम्येन कुत्वविषयिणी जिज्ञासा कृता या च व्याकरणस्य छान्दसत्वेन समाहिता। ततः तद्भावितातद्भावितपक्षविचारः कृतः यः अतद्भावितपक्षं सिद्धान्तत्वेन उपस्थाप्य समाहितः। तत्र उद्भावितास्समेपि क्लेशाः समासविग्रहान्तरप्रदर्शनेन व्यपगताः। ततः संज्ञाधिकारस्य कर्तव्यता आग्रहेण

विचार्य आचार्याचारादेव तत्सिद्धिरिति समाहितम्। तन्मध्ये एव लिङ्गेनैव उपदेशो भवतु इति पृष्टे न तथा कर्तुं शक्यम् एवं सति अपाणिनीयत्वापत्तिः। ततः प्रकृतसूत्रे संज्ञासंज्ञिनोर्विषये आशङ्कां कृत्वा नेमौ तथापि तु आदेशौ इत्यादिचर्चाः समापाद्य इमौ संज्ञासंज्ञिनावेव इति समाहितम्। प्रायेण सर्वत्र संज्ञायाः संज्ञिनः परप्रयोगदर्शनादिहापि प्रश्नः उद्भाव्यते किमिदं संज्ञाशास्त्रमुत अन्यदेवेति। तत्र हि बहुभिः अंशैस्स समाधीयते। तथैव इतरेतराश्रयत्वमिहैव प्राथम्येन चर्चितम्। तस्य च शास्त्रस्यास्य निवर्तकत्वात् समाधानमप्युक्तम्। आदैचोः उभयोः संज्ञा भवतु इति तत्र सहग्रहणं कर्तव्यमिति आग्रहे सत्यपि विनापि तद्ग्रहणम् इष्टं सिद्ध्यति इति न तत्कार्यम् इत्यागतम्। ततः तपरकरणस्य अपेक्षाविचारः आरब्धः। तत्रैव गुणा भेदका अभेदकाश्च इति विषयोऽपि चर्चितः। तत्र हि अभेदका गुणा इति सिद्धान्तितम्। अन्ततस्तु तपरकरणस्य नान्यत्किञ्चित्प्रयोजनं मुखसुखं विहायेति विज्ञातम्। एताः सर्वाः चर्चाः प्रदीपोद्योतयोरपि सहेतु कृता दृश्यन्ते।

**लक्ष्मीटीकायां वर्तमानः विषयक्रमः**

इहापि टीकायां महाभाष्यस्य कुत्वविषयादेव चर्चा आरब्धा। तथैव इह आदैच् इति समासे कृते सति तत्र **द्वन्द्वाच्चुदषहान्तात्समाहारे**[3] समासान्तः टच् कुतो नेति प्रश्नं कृत्वा उभयथा समाहितम्।

I. नात्र समासः अपि तु पदत्रयम्।

II. समासान्तविधेरनित्यत्वम्।

किन्तु **कृतमनयोः साधुत्वम्**[4] इति वदता भाष्यकृता इह आत् ऐच् इति पदद्वयं न अपि तु वृद्धिः, आत्, ऐच् इति पदत्रयम् अस्ति इति बोधयति। एवं सति अत्र समासान्तशङ्कैव नोद्भवति खलु चेत्तत्र समाहितं यत् भाष्यकारेणात्र अनयोः इति पदेन उद्देश्य-विधेयदलयोर्निर्देशः कृतः। यत्तु समासान्तविधेरनित्यताङ्गीकारः स तु न युक्तः, अनित्यत्वस्य अगतिकगतित्वात्। यदि तु **द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ**[5] इत्यत्र **द्वित्रिभ्यां ष मूर्ध्नः**[6] इत्यत्र मूर्धेषु इति कथनीये मूर्धसु इति कथितम् इत्यतः अवगम्यते यत् इह समासान्तः अनित्य इति। इत्येवं यदि आश्रीयते तर्हि सूत्रस्य पदद्वयत्वे न कश्चित्क्लेशः। ऐच् इत्यत्र यद्यपि द्वौ वर्णौ गृहीतौ चेत् द्विवचनेन भवितव्यम् इति चेन्न, यथा आत् इत्यत्र आत्वजातित्वेन एकवचनं पुरस्कृतं तथैव ऐच् इत्यत्रापि ऐच्त्वजातिः इत्यतः एकवचनमेव। इह तिरोहितावयवभेदसमूहाभिप्रायेण विवक्षा। यत्र तद्भूतावयवविवक्षा तत्र बहुवचनं भवत्येव। वृद्धिः इत्यस्य स्वरूपार्थकत्वमेव। अन्यथा –

- घटो घटः इतिवत् आदैच् आदैच् इति असङ्गतबोधापत्तिः।
- वृद्धिः संज्ञा, आदैच् संज्ञी इति इष्टार्थलाभानापत्तिः।

तपरविषयेऽपि टीकाकारेण उक्तं यत् आत्पदवाच्याः षड् तथैव तात् परत्वात् ऐचोऽपि द्वादश एव। अत एव कृष्णैकत्वम् इत्यत्र वृद्धिः द्विमात्रिका एव। अग्रे च इहापि कुत्वविषयिणी चर्चा कृता। समानमेव समाधानं दत्तम्। अत्र इयानेव विशेषः यत् – वस्तुतस्तु इयुक्त्वा निर्देशैः सुप्सकारपरत्वाभावे प्रत्याहारघटकस्य कुत्वं नेति ज्ञाप्यते इत्युक्तम्। ते च निर्देशा एवम् –

- उपदेशेऽजनुनासिक इत्[7]
- अजादेर्द्वितीयस्य[8]
- इजादेः सनुमः[9] इत्यादि।

अत एव दीक्षितोक्ता अपि निर्देशाः – अज्भिरव्यवहिताः, अनुनासिकोऽजित्संज्ञः, अजादीनाम् इत्यादयः सङ्गच्छन्ते। सकारपरकत्वं नास्ति अत एव अचोऽक्षु इति कुत्वं सङ्गच्छते। एतावता बालमनोरमायां लघुशब्देन्दुशेखरे च अच्सन्धिः इत्यत्र कुत्वाभावः निर्देशैरुक्तः। किन्त्वत्र टीकाकारेण सुप्सकारपर-कत्वाभावात् इति हेतुरुक्तः। नात्र केवलस्य आकारस्य समुदायस्य एव वृद्धिसंज्ञा अपि तु त्रयाणामपि। अत्र गमकं **मालादीनां च**[10] इति सूत्रम्। **प्रस्थेऽवृद्धमकर्क्यादीनाम्**[11] इति सूत्रे योऽयं पर्युदासः कृतः तस्मात् प्रागेव **मालादीनां च** इति निषेधः कृतः। तथैव अत्र टीकाकारेण अनाकृतिः संज्ञा इत्यत्र अनाकृतिः इत्यस्य भेदरहिताः इत्यर्थः स्वीकृतः।

**फलम्**

भाष्ये लक्ष्मीटीकायां च मिथः एवं विशेषाः मया दृष्टाः –

- भाष्ये दीर्घः प्रश्नपुरस्सरः क्रमः आदृतः, इह तु बहून् विषयान् सङ्गृह्य प्रस्तुतिरस्ति।
- भाष्ये कुत्वाभावविषयस्य प्रकृतसूत्रे क्वापि उल्लेखः नास्ति, इह तु सप्रमाणं टीकाकारेण प्रस्तुतम्।
- अनाकृतिः इत्यस्य भेदरहिताः इत्यर्थः इह स्पष्ट एव उक्तः।

**संदर्भ ग्रंथ:**

[1] पाणिनिसूत्रम् – ८.४.५३

[2] महाभाष्यम् – पस्पशाह्निकम्

[3] पाणिनिसूत्रम् – ५.४.१०६

[4] महाभाष्यम् – पस्पशाह्निकम्

[5] पाणिनिसूत्रम् – ६.२.१९७

[6] पाणिनिसूत्रम् – ५.४.११५

[7] पाणिनिसूत्रम् – १.३.२

[8] पाणिनिसूत्रम् – ६.१.२

[9] पाणिनिसूत्रम् – ८.४.३२

[10] पाणिनिसूत्रम् – ६.२.८८

[11] पाणिनिसूत्रम् – ६.२.८७